## **संस्कृत वार्ता:**

**दिनाङ्क** : **19.06.2026** **सायम्** - **06:20**

**<u>आदौ मुख्यवार्ता:</u>**

- प्रधानमन्त्रिण: नरेन्द्रमोदिन:फ्रान्स-स्लोवाकिया-देशयो: च पञ्चदिवसीया ऐतिहासिकी यात्रा सफ़लतया सम्पन्ना।
- सप्तचत्वारिंशदुत्तर द्विसहस्र-वर्षात् पूर्वमेव सिकल-सेल-रोगस्य उन्मूलनं भविष्यति वदति राष्ट्रपति द्रौपदी मुर्मु:।
- नीट-पुनर्परीक्षायाः प्राक् टेलिग्राम-सामाजिक-संपुटकस्य अस्थायिरूपेण निषेधः वैधानिकः उक्तम् दिल्ली उच्च न्यायालयेन ।
- भारतेन संयुक्तराष्ट्रसङ्घस्य मानव-अधिकार-परिषदि पाकिस्तानस्य कट्वालोचना कृता तथा च "प्राचीनम्" सिन्धु-जल-सन्धिम् वर्तमान-वास्तविकतायाः कृते अनुपयुक्तम् इत्यपि उक्तम्।
- **अपि च,**
- फीफा-विश्वचषक-प्रतियोगितायां मेक्सिको-दलेन दक्षिण-कोरिया-दलम् एक-शून्य- अंकान्तरालेन पराजितम्

**अथ वार्ता: विस्तरेण**

**प्रधानमन्त्री द्वि-देशस्य यात्रा**

प्रधानमन्त्रिणः नरेन्द्रमोदिनःफ्रान्स-देशस्य स्लोवाकिया-देशस्य च पञ्चदिवसीया ऐतिहासिकी यात्रा सफ़लतया  सम्पन्ना। फ्रान्सदेशे सः जी-सप्त शिखर-सम्मेलने सहभागित्वं कृतवान्। तत्र अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड-ट्रम्प-महोदयेन, जर्मनी-देशस्य चान्सलर इत्यनेन  -फ्रेडरिक-मर्ज-महोदयेन, ब्रिटेन-देशस्य प्रधानमन्त्रिणा  कीर-स्टार्मर-महोदयेन, संयुक्त-अरब-अमीरात-देशस्य राष्ट्रपतिना शेख-मोहम्मद-बिन-जायेद-अल-नहयान-महोदयेन च सह द्विपक्षीय-वार्ताः अभवन् । सः फ्रान्सदेशस्य राष्ट्रपतिना इमैनुएल-मैक्रों-महोदयेन सह 'भारत इनोवेट्स' इत्यस्य कार्यक्रमस्य उद्घाटनमपि कृतवान्। स्लोवाकिया-देशे प्रधानमन्त्री मोदी राष्ट्रपतिं पीटर-पेलेग्रिनी-महोदयममिलत् । तस्मिन् अवसरे सः ऑर्डर ऑफ द व्हाइट डबल क्रॉस, फर्स्ट क्लास इत्याख्येन  स्लोवाकिया-देशस्य सर्वोच्च-  राजकीय- सम्मानेन सम्मानितः।

**प्रधानमन्त्री-भारतम्**

विश्वस्य विश्वासपात्रसहकारिरूपेण भारतस्य उदयः– कथयति प्रधानमन्त्री नरेन्द्रमोदी। पेरिसनगरे भारतीयप्रवासिजनान् सम्बोधयन् प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् भारतं विश्वस्य विश्वासपात्रसहकारिरूपेण उदेति। तेन उक्तं यत् पूर्वं राष्ट्राणां सम्बन्धाः मुख्यतः व्यापाराधारिताः आसन्, किन्त्वधुना व्यापारेण  सह विश्वासोऽपि समानरूपेण महत्त्वपूर्णः जातः। प्रत्येकं राष्ट्रं विश्वसनीयाम् आपूर्तिशृङ्खलां दीर्घकालिकं सहयोगं च अपेक्षते। प्रधानमन्त्री प्रोक्तवान् यत् भारतं विकासाय, नवाचाराय, च विविधेषु क्षेत्रेषु निवेशं

वर्धापयति । तेन जी-सप्त-शिखरसम्मेलनेऽपि विश्वासाधारितसहयोगस्य महत्त्वं प्रतिपादितम्।

**राष्ट्रपति- विश्व-सिकल-सेल-दिवसस्य**

विश्व-सिकल-सेल-दिवसस्य अवसरे मध्यप्रदेशस्य ओंकारेश्वरे आयोजिते राज्यस्तरीये कार्यक्रमे राष्ट्रपतिः द्रौपदी मुर्मु विश्वासं प्रकटितवती यत् भारतं सप्तचत्वारिंशदुत्तर द्विसहस्र-वर्षस्य राष्ट्रियलक्ष्यात् पूर्वमेव सिकल-सेल-रोगात् उन्मूलनं करिष्यति। सा विशेषतः जनजातीय-समुदायेषु अस्य आनुवंशिक-रक्तविकारस्य विषये जागरूकतावर्धनाय समन्वित-प्रयत्नानाम् आह्वानम् अकरोत्। अस्मिन् अवसरे मध्यप्रदेशस्य राज्यपालः मंगुभाई पटेलः तथा मुख्यमन्त्री मोहन यादवः अपि उपस्थिताः आसन् । राष्ट्रपतिः राज्य-सर्वकाराणां अधिकारिणः च अस्य रोगस्य उन्मूलनार्थं गम्भीरप्रयत्नान् कर्तुम् आग्रहं कृतवती। तया राष्ट्रिय-सिकल-सेल-अनीमिया-उन्मूलन-मिशन इत्यासां उपलब्धीनां प्रशंसा कृता।

तथा त्रयोविंशत्युदुत्तर द्विसहस्र तमे वर्षे निर्धारितं व्यापक-परीक्षण-लक्ष्यं समयात् पूर्वमेव सिद्धम् इत्यत्र तया सन्तोषः व्यक्तः।

राष्ट्रपतिः अद्य सायंकालात् स्वगृहराज्यं ओडिशां प्रति द्विदिवसीय-भ्रमणाय प्रस्थितवती।

**दिल्ली उच्च नायायालयः नीट**

नीट-पुनर्परीक्षायाः प्राक् सामाजिक-संपुटकस्य टेलिग्राम- इत्यस्य अस्थायिरूपेण निषेधः वैधानिकः उक्तं दिल्ली उच्च न्यायालयेन । दिल्ली-उच्चन्यायालयेन नीट-यूजी पुनर्परीक्षायाः पूर्वं टेलिग्रामसंपुटकस्य अस्थायि-निषेधसम्बद्धः केन्द्रप्रशासनस्य निर्णयः अनुमोदितः। न्यायाधीशः तेजस-करिया उक्तवान् यत् एषः निर्णयः सूचना-प्रौद्योगिकी-अधिनियमस्य धारा-एकोनसप्तत्यधिक-षष्ट्याः प्रक्रियानुसारं कृतः।

**फ़िङ्गर् प्रिंट**

केन्द्रीयगृहमन्त्री अमितशाहः अद्य नवदिल्ल्यां आल इण्डिया फ़िङ्गर् प्रिंट -सम्मेलने अवदत् यत् अपराधन्यायव्यवस्था नागारिकाणां संविधानप्रदत्ताधिकारप्राप्तेः उपयुक्तसाधनरूपेण विकसितुं आवश्यकम्। तेन उक्तं यत् एषा व्यवस्था परिवर्तमाने चरणे वर्तते तथा समकालिकावश्यकतानुसारं क्रमशः विकसितं क्रियते।

**मानव-अधिकार-परिषदि**

भारतेन संयुक्तराष्ट्रसङ्घस्य मानव-अधिकार-परिषदि पाकिस्तानस्य कट्वालोचना कृता तथा च सिन्धु-जल-सन्धिम् "प्राचीनम्" वर्तमानकालस्य वास्तविकतायाः कृते अनुपयुक्तम् इत्यपि उक्तम्। मानव-अधिकार-परिषदः द्विषष्टितमे सत्रे संयुक्तराष्ट्रसङ्घस्य भारतस्य स्थायि -अभियानस्य प्रथमसचिवः अनुपमा सिङ्घः इत्येषा उक्तवती यत्, नीत्याधारित रूपेण आतङ्कवादस्य निर्यातकः एकः देशः सद्भावनायाः मित्रतायाः च आधारेण सहकारस्य विशेषाधिकारान् निरन्तरं याचते।

संयुक्तराष्ट्रसङ्घे पाकिस्तानेन इस्लामिक्-सहकार-सङ्घटनेन (ओ. आई. सी.) इत्यनेन च जम्मू-कश्मीरस्य चर्चायै इस्लामाबादस्य अपि अनुपमा सिङ्घ्-वर्या आलोचनां कृतवती, जम्मू-कश्मीरम् "भारतस्य अभिन्नः अविभाज्यः च भागः आसीत्, अस्ति, भविष्यति च" इति दृढतया प्रोक्तवती।

**प्रधानमन्त्री- विकसित भारत रोजगार**

विकसितभारतरोजगारयोजनायाः अन्तर्गतं प्रोत्साहनराशेः वितरणं करिष्यति प्रधानमन्त्री नरेन्द्रमोदी। अद्य नवदिल्ल्यां  प्रधानमन्त्री-विकसितभारत-रोजगारयोजनायाः अन्तर्गतं चतुशशत- उत्तर -द्विसहस्र-कोटिरूप्यकाणां प्रोत्साहनराशेः वितरणं करिष्यति। एषा योजना आजीविकानां सर्जनं प्रोत्साहयितुं यूनां सशक्तीकरणाय च समर्पिता वर्तते।

**अश्विनीवैष्णवःबिहार**

द्वितीय-तृतीय-श्रेणी-नगरेष्वपि एसटीपीआई-जालानां विस्तारस्य योजनास्ति इति  अश्विनीवैष्णवेन उक्तम् ।केन्द्रीय-विद्युत -सूचनाप्रौद्योगिकी-मन्त्री अश्विनीवैष्णवः उक्तवान् यत् प्रधानमन्त्रिणः  नरेन्द्रमोदिनः नेतृत्वे सॉफ्टवेयर-टेक्नोलॉजी-पार्क्स्-ऑफ्-इण्डिया इत्यस्य जालस्य विस्तारः देशस्य द्वितीय-तृतीय-श्रेण्याः नगरेष्वपि कृतः। पटना-स्थितस्य एसटीपीआई-केन्द्रस्य भ्रमणावसरे तेन बिहारस्य सूचना-प्रौद्योगिकी-प्रविधि परितन्त्रस्य विकासविषये केन्द्र-राज्य-प्रशासनयोः    सहयोगस्य चर्चा कृता। तेन बिहारराज्ये आईटी- सूचनाप्रविधेः क्षेत्रस्य संवर्धने मुख्यमन्त्रिणः सम्राटचौधरी-महोदयस्य प्रयत्नाः अपि प्रशंसिताः।

**<u>संघ-लोक-सेवा-आयोगस्य</u>**

संघ-लोक-सेवा-आयोगेन नवदिल्ल्यां  प्रशासनिक-आवश्यकतानां पूर्त्यर्थं नूतन-कार्यालयस्य उद्घाटनं कृतम्। आयोगाध्यक्षेन डॉ. अजयकुमारेण अन्यैः सदस्यैः सह अस्य सुविधाकेन्द्रस्य लोकार्पणं सम्पन्नम्।

**<u>भारतीय-वायुसेना</u>**

भारतीय-वायुसेना जूनमासस्य एकविंशतितमे  -दिनांके  अन्तार्राष्ट्रीय-योगदिवसम् आलक्ष्य देशव्यापिनाम्  योगसत्राणाम् आयोजनं करिष्यति। एषु कार्यक्रमेषु वायुसैनिकाः, एनसीसी-प्रशिक्षार्थिनः तथा विद्यालयीय-विद्यार्थिनः अपि सहभागित्वं करिष्यन्ति।

**<u>भारतीय-ऋतु -विभागः</u>**

ऋतु -विभागेन देशस्य विभिन्नेषु भागेषु अतिवृष्टेः पूर्वानुमानं प्रकटितम्। भारतीय-ऋतु -विभागेन बिहार- तमिलनाडु-पश्चिमबङ्गालराज्यानि  तथा पूर्वोत्तर-राज्येषु श्वः पर्यन्तं अतिवृष्टेः पूर्वानुमानं कृतम्। हिमाचलप्रदेश-जम्मू-कश्मीर-लद्दाखादिषु प्रदेशेषु हिमवृष्ट्या सह मेघगर्जनस्य सम्भावना अपि प्रकटिता ।

**झारखण्डे वज्रपातः**

झारखण्डे वज्रपात-घटनासु अष्ट जनाः मृताः। झारखण्डराज्ये गत-चतुर्विंशति-होरासु पृथक्-पृथक् स्थानेषु वज्रपात-घटनायाम् अष्ट जनानां मृत्युर्जाता। अनेके जनाः आहताः अपि अभवन्। हजारीबाग-जनपदे त्रयः जनाः मृताः, रामगढ, आदि जनपदेषु च एकैकस्य जनस्य मृत्युः अभवत्।

**फीफा-विश्वचषके मेक्सिको-दलस्यविजयः**

फीफा-विश्वचषक-प्रतियोगितायां मेक्सिको-दलेन दक्षिण-कोरिया-दलम् एक-शून्य-अंकान्तरालेन पराजितम् । अनेन विजयेन मेक्सिको-दलं प्रतियोगिरूपेण द्वात्रिंशत्रत् चरणे प्रविशत्सु दलेषु प्रथमं राष्ट्रं जातम्।

**॥ इति वार्ता: ॥**